# || संस्कृत ||

## प्रथमः पाठः

## वाराणसी

### (बनारस)

वाराणसी सुविख्याता प्राचीना नगरी। इयं विमलसलिलतरङ्गायाः गङ्गायाः कूले स्थिता। अस्याः घट्टानां वलयाकृतिः पंक्तिः धवलायां चन्द्रिकायां बहु राजते। अगणिताः पर्यटकाः सुदूरेभ्यः देशेभ्यः नित्यम् अत्र आयान्ति, अस्याः घट्टानाञ्च शोभां विलोक्य इमां बहु प्रशंसन्ति।

वाराणस्यां प्राचीनकालादेव गेहे गेहे विद्यायाः दिव्यं ज्योतिः द्योतते। अधुनाऽपि अत्र संस्कृतवाग्धारा सततं प्रवहति, जनानां ज्ञानञ्च वर्द्धयति। अत्र अनेके आचार्याः मूर्धन्याः विद्वांसः वैदिकवाङ्मयस्य अध्ययने अध्यापने च इदानीं निरताः। न केवलं भारतीयाः अपितु वैदेशिकाः गीर्वाणवाण्याः अध्ययनाय अत्र आगच्छन्ति, निःशुल्कं च विद्यां गृह्णन्ति। अत्र हिन्दूविश्वविद्यालयः, संस्कृतविश्वविद्यालयः, काशीविद्यापीठम् इत्येते त्रयः विश्वविद्यालयाः सन्ति, येषु नवीनानां प्राचीनानाञ्च ज्ञानविज्ञानविषयाणाम् अध्ययनं प्रचलितः।

एषा नगरी भारतीयसंस्कृतेः संस्कृतभाषायाश्च केन्द्रस्थलम् अस्ति। इत एव संस्कृतवाङ्मयस्य संस्कृतेश्च आलोकः सर्वत्र प्रसृतः। मुगलयुवराजः दाराशिकोहः अत्रागत्य भारतीय-दर्शन-शास्त्राणाम् अध्ययनम् अकरोत्। स तेषां ज्ञानेन तथा प्रभावितः अभवत्, यत् तेन उपनिषदाम् अनुवादः पारसीभाषायां कारितः।

इयं नगरी विविधधर्माणां संगमस्थली। महात्मा बुद्धः, तीर्थङ्करः पार्श्वनाथः, शङ्कराचार्यः, कबीरः, गोस्वामी तुलसीदासः, अन्ये च बहवः महात्मानः अत्रागत्य स्वीयान् विचारान् प्रासारयन्। न केवलं दर्शने, साहित्ये, धर्मे, अपितु कलाक्षेत्रेऽपि इयं नगरी विविधानां कलानां, शिल्पानाञ्च कृते लोके विश्रुता। अत्रत्याः कौशेयशाटिकाः देशे देशे सर्वत्र स्पृह्यन्ते।

अत्रत्याः प्रस्तरमूर्तयः प्रथिताः। इयं निजां प्राचीनपरम्पराम् इदानीमपि परिपालयति—तथैव गीयते कविभिः—

**मङ्गलं मरणं यत्र विभूतिर्यत्र भूषणम्।**
**कौपीनं यत्र कौशेयं काशी केनोपमायते॥**

## || अभ्यास प्रश्न ||

### ➡ लघु उत्तरीय प्रश्न

**निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए—**

1. वाराणसी नगरी कस्याः नद्याः कूले स्थिता? **(2016CF,19AB,AD)**

**अथवा**

वाराणसी नगरी कस्य कूले स्थिता?

2. वाराणसी कस्याः भाषायाः केन्द्रम् अस्ति? **(2019AG)**
3. कुत्र मरणं मङ्गलं भवति? **(2016CC,17AC,18HF,20MC)**
4. वाराणसी किमर्थं प्रसिद्धा? **(2019AA)**

**अथवा**

वाराणसी नगरी केषां कृते लोके विश्रुता अस्ति?

5. वाराणसी कस्याः केन्द्रस्थली अस्ति?
6. वैदेशिकाः किमर्थं वाराणसीम् आगच्छन्ति?
7. वाराणस्यां कति विश्वविद्यालयाः सन्ति? **(2017AA)**
8. दाराशिकोहः अत्रागत्य केषाम् अध्ययनं अकरोत्?
9. दाराशिकोहः कस्यां भाषायाम् उपनिषदाम् अनुवादम् अकारयत्?
10. वाराणसी कस्य संगमस्थली अस्ति? **(2018HA,20MB,ME,MF)**
11. वाराणस्याः कानि वस्तूनि प्रसिद्धानि सन्ति?
12. वाराणसी नगरी कुत्र स्थिता अस्ति?
13. विविध धर्माणां संगमस्थली कः नगरी अस्ति?
14. कस्याः शोभां विलोक्य पर्यटकाः बहु प्रशंसन्ति?
15. सम्पूर्णानन्द संस्कृत विश्वविद्यालयः कस्यां नगर्यां विद्यते? **(2017AF)**
16. वाराणसी नगरी केषां संगमस्थली अस्ति? **(2020ME)**
17. वैदेशिकाः पर्यटकाः कस्याः शोभाम् अवलोक्य वाराणसीं प्रशंसति?

## ➨ अनुवादात्मक प्रश्न

**1. निम्नलिखित संस्कृत गद्यांशों का ससन्दर्भ हिन्दी में अनुवाद कीजिए—**

(क) वाराणसी सुविख्याता.................... इमां बहु प्रशंसन्ति। **(2016CA,19AA,AE)**

**अथवा**

वाराणस्यां प्राचीनकालादेव.............................. प्रचलितः। **(2020MB,MF)**

(ख) अधुनाऽपि.......................... विश्वविद्यालयाः सन्ति। **(2016CG)**

**अथवा**

अधुनाऽपि ........................................विद्यां ग्रहणन्ति।

**अथवा**

अत्र अनेके.......................................अध्ययनं प्रचलितः।

(ग) एषा नगरी................................... भाषायां कारितः। **(2016CD,CE,19AC,20ME)**

(घ) इयं नगरी......................................... सर्वत्र स्पृह्यन्ते। **(2017AF)**

(ङ) महात्मा बुद्धः ................................ . लोके विश्रुता।

(च) अत्रत्याः...........................................केनोप मायते।

(छ) मङ्गलम् मरणं ................................ . केनोपमायते।

**2. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए—**

(क) अगणित पर्यटक दूर देशों से वाराणसी आते हैं।
(ख) वे यहाँ निःशुल्क विद्या ग्रहण करते हैं।
(ग) यह नगरी विविध कलाओं के लिए प्रसिद्ध है।
(घ) वाराणसी की पत्थर की मूर्तियाँ प्रसिद्ध हैं।
(ङ) वाराणसी में मरना मङ्गलमय होता है।

## ➠ व्याकरणात्मक प्रश्न

1. निम्नलिखित शब्दों में कारण सहित विभक्ति बताइए—
देशेभ्यः, अध्ययनाय, स्वीयान्, गङ्गायाः, कूले।
2. निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए तथा सन्धि-नियम भी लिखिए—
अत्रागत्य, वलयाकृतिः, वाग्धारा।

## ➠ आन्तरिक मूल्यांकन

वाराणसी की विशेषताओं की एक सूची तैयार कीजिए।

## शब्दार्थ

**सुविख्याता** = सुप्रसिद्ध। **विमलसलिलतरङ्गायाः** = निर्मल जल की लहरों की। **घट्टानां** = घाटों की। **कूले** = किनारे पर। **वलयाकृतिः** = घुमावदार आकृतिवाली। **वाग्धारा** = वाणी का प्रवाह। **गीर्वाणवाण्याः** = देववाणी संस्कृत का। **लोके विश्रुता** = जग प्रसिद्ध। **कौशेयशाटिकाः** = रेशमी साड़ियाँ। **कौपीनम्** = लँगोट। **उपमायते** = उपमा दी जा सकती है, तुलना की जा सकती है। **घट्टानां** = घाटों की। **निरताः** = लगे हुए हैं। **अध्ययनं प्रचलितः** = अध्ययन चलता रहता है। **संस्कृतेश्च** = संस्कृति का। **प्रसृतः** = फैला है। **कारितः** = कराया। **स्वीयान् विचारान् प्रासारयन्** = अपने विचारों का प्रसार किया। **शिल्पानाम्** = शिल्पों के। **कृते** = लिए। **स्पृह्यन्ते** = चाही जाती है। **अत्रात्याः** = यहाँ की। **प्रस्तरमूर्तयः** = पत्थर की मूर्तियाँ। **प्रथिताः** = प्रसिद्ध है।

●●